CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 121.

Title 'SRAUTA RITUAL -A work on.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 121 Subject: Vedic ('Srauta Ritual)

Title: 'Srauta Ritual — Anonymous

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9-3" x 5-6" Extent: 27 foll.

Language: Sanskrit Script: Devanagari.

Remarks: Complete.

१ श्रीगणेशाय नमः॥ ॥ इषे त्वादिखं ब्रह्मांतं विवस्वान पत्रपत्य रमेष्ठी प्रा
जापत्यो दर्शपूर्णमासमंत्राणामृषिर्देवा वा प्राजापत्याः २॥ गार्हपत्यमुत्तरे
णोदपात्रं निधायालभते ॰ व्रतस्त्वा व्रतं करिष्यामि ब्रह्मन्नपः प्रणेष्यामि
यजमान वाचंयच्छ ॥ ॐ प्रणयेति ब्रह्मा जपति ॥ अनुज्ञात उत्तरेणाहवनी
॰ संप्रति निदधाति कस्त्वेति ॥ ॐ कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति
तस्मै त्वा युनक्ति । नांतरेणागच्छेयुः हृणेरग्नीम्परिस्तीर्य पुरस्तात्प्रथमं । द्वि
शपात्राणि सं॰सादयति यजमानो वा ॥ अपणस्य पश्चादुत्तरतो वा ॥ शूर्पा
ग्निहोत्रहवणी । स्फ्यकपालं । शम्याकृष्णाजिनं । उलूखलमुशलं । दृषदु
पलं । पात्री धान्यं । पवित्रछेदनकुशाः पवित्रे च । दृष्ठिः संयवनोदकं स्था
लीं आज्यं च । वेदश्च दक्षिणार्थः । उदकस्त्रणमन्त्रिः । इध्मावर्हिः स्रुवो जुहू १

उपभृत् ध्रुवा संमार्गहविर्धान्यानि च । प्राशित्रहरणं । अन्तावदानं । पुरोडा
शपात्री । इत्येतानि संमार्गहीणि । योक्त्रं मूलं कुशास्परिधय । होत्रपी स्त्रय:
ठं कुशस्तीर्णे । इडाखण्डवन्तं च । अंतर्धानिकटः पूर्णपात्रं च । इत्यासा
दनं । अपणस्य पश्चात्स्फ्योपहितायां पात्र्यामौषधकरणं । कर्मणे वामिति
शूर्पाग्निहोत्रहवण्यादाय वाचंयच्छति । ॐ कर्मणे वां वेषाय वां । प्रतप
नं प्रत्युष्टनिष्टप्तमिति वा । ॐ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः । उदको॰ त्यु
गछन्नूर्वंतरिक्षमिति ॐ उर्वन्तरिक्षमन्वेमि धूरिषा रोहणानि पात्री बिले
जपति । ॐ धूरसि धूर्व धूर्वंतं धूर्व तं योस्मान्धूर्वति तं धूर्व यं वयं धूर्वामः । देवा
नामसि वह्नि डृा तमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमं । अह्रु
तमसि हविर्धानं दृं॰हस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् । विष्णुस्त्वाक्र

२ मनां प्रेक्षणउरुवातायेतिद्र। विष्णान्। ॐउरुवाताय। अपहतमिइति निर
स्यत्यन्यद्विद्यमाने निम्नदेशे। ॐअपहतं रक्षः ३०। यच्छंतामित्याल
भते। ॐयच्छंतां पंच। देवस्य त्वेति गृह्णात्याग्नेयं चतुरो मुष्टीन्। ॐदेवस्य त्वा स
वितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां अग्नये जुष्टं गृह्णामि। वा० २ चतु
र्थं तूष्णीं।। एवमग्नीषोमीयं यथादेवतमन्यत्तं देवस्य त्वा०।। भ्यां अग्नी
षोमाभ्यां जुष्टं गृह्णामि।। अमावास्यायामिंद्राग्निभ्यां०। चतुर्थं तूष्णीं। भू
ताय त्वेति शेषाभिमर्शनं।। ॐभूताय त्वा नारातये। स्वरिति प्राङीक्षते।।
ॐस्वरभिविख्येषं दृंहंतामित्युत्थानं। ॐदृंहंतां दुर्याः पृथिव्यां। उरु
र्वंतरिक्षमिति। ॐउर्वंतरिक्षमन्वेमि। अपणस्य पश्चाच्छादयति पृथि
व्यास्त्वेति। ॐपृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थेग्ने हव्यं रक्ष। २

ऋजौ समावप्रच्छिन्नाग्रावनंतर्गर्भौ। ऋजौ छिनत्ति। पवित्रे स्थ इति। ॐप
वित्रे स्थो वैष्णव्यौ। हविर्ग्रहणपात्रमपः कृत्वा। ताभ्यामुत्पुनाति। सवितुर्व इति।।
ॐसवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। नास्वा स्थाने त
योः। सव्ये कृत्वा दक्षिणेनोद्दिंगयति देवीराप इति। ॐदेवीरापो अग्रेगुवो अ
ग्रेपुवोग्रेद्य इममद्य यज्ञं नयताग्रे यज्ञपतिं सुधातुं यज्ञपतिं देवयुवं। युष्मा इं
द्रो वृणीत वृत्रतूर्ये यूयमिंद्रमवृणीध्वं वृत्रतूर्ये। प्रोक्षिताः स्थेति तासां प्रोक्षणं
। ॐप्रोक्षिताः स्थ हविरसि। ॐब्रह्मन् हविः प्रोक्षिष्यामि। ॐप्रोक्ष। ब्रह्मा वदति। अ
ग्नेय त्वाग्नीषोमाभ्यां त्वेति यथादेवतमन्यत्। ॐअग्नये त्वा जुष्टं प्रोक्षामि। ॐअ
ग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि। पात्राणि दैव्यायेति। स्फ्यं न्यस्य विमुच्य। दैव्या
य कर्मणे शुंधध्वं देवयज्यायै यद्वोशुद्धाः पराजघ्नुरिदं वस्तच्छुंधामि पात्राणि

२ प्रोक्षणं। सकृन्मंत्रेण द्विस्तूष्णीं। असंचरे प्रोक्षणीर्निधाय। शर्मासीति कृ
ष्णाजिनादानं। ॐ शर्मासि। अपेत्य पात्रेभ्योवधूतमिति। ॐ अवधूत
ꣳ रक्षोवधूता अरातयः। उ ७। प्रत्यग्ग्रीवमास्तरणमदित्यास्त्वगिति। ॐ अदि
त्यास्त्वगसि प्रतित्वादितिर्वेत्तु। सव्यापूर्व्येनिदधात्युलूखलमद्रिरसि ग्रावा
सीति वा। ॐ अद्रिरसि वानस्पत्यः प्रतित्वादित्यास्त्वग्वेत्तु। हविरापत्य अग्नेस्त
नूरसीति। ॐ अग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णामि। वृहद्ग्रावे
ति मुशलमादत्ते। ॐ वृहद्ग्रावासि वानस्पत्यः। स इदमित्यवदधाति। ॐ स
इदं देवेभ्यो हविः शमीष्व सुशमि शमीष्व। हविष्कृदेहीति त्रिराह्वयति। ॐ ह
विष्कृदेहि। ॥३॥ वाचं विसृजेद्यजमानश्च। अतः पत्न्यवहंत्यन्यो वाऽऽक
यत्याह्यन्योद्दृषदुपलेऽकुक्कुटोसीति त्रिः शम्यया द्विर्दृषदꣳ सकृदुप २

पलां। ॐ कुक्कुटोसि मधुजिह्व इषमूर्जमावद त्वया वयꣳ संघातꣳ संघा
तं जेष्म वर्षवृद्धमसीति शूर्पमादत्ते। ॐ वर्षवृद्धमसि प्रत्वेति हविरुद्वपति
ॐ प्रतित्वा वर्षवृद्धं वेत्तु। परापूतमिति निष्पुनाति। ॐ परापूतꣳ रक्षः परा
पूता अरातयः। ॥उ०॥ वायुर्व इति विविनक्ति। ॐ वायुर्वो विविनक्तु। उ
पसमर्पणमध्वर्यवे। त्रिःफलीकृतां पुनः कंडनं। पूर्वेना तांस्तुषानुत्की
कृत्य उत्करे प्रक्षिपेत्। अपहतमिति तुषान्निरस्यति। ॐ अपहतꣳ रक्षः
। उ०। देवो व इति पात्र्यामोप्याभिमंत्रयते। ॐ देवो वः सविता हिरण्यपा
णिः प्रतिगृह्णात्वच्छिद्रेण पाणिना। एवं त्रिःफलीकृत्य करणक्षणमूल
खलमध्ये पेषणोपधाने युगपत्॥४॥ उपसर्जनीरधिश्रयति। शर्मा
सीति कृष्णाजिनादानं। ॐ शर्मासि उत्करे। अपेत्य पात्रे। ॐ अवधूतꣳ

४ रक्षोवधूता अरातयः ॐ०॥ प्रत्यग्रीवमास्तृणा दित्यास्त्वगिति। ॐ अदित्या
स्त्वगसि प्रति त्वादितिर्वेत्तु। सव्याहस्तेन शम्यां दृषदं धिषणासीति। ॐ धिषणा
सि पर्वती प्रति त्वा दित्यास्त्वग्वेत्तु। पश्चाच्छम्यामुपोहत्युदीचीं दिव इति। ॐ दिव
स्कंभनीरसि। दृषदुपलां धिषणासीति। ॐ धिषणासि पार्वतेयी प्रति त्वा
पर्वती वेत्तु। धान्यमसीति तंदुलानोप्य। ॐ धान्यमसि धिनुहि देवान्। पि
नष्टि प्राणाय त्वेति प्रतिमंत्रं। ॐ प्राणाय त्वा उदानाय त्वा। अर्द्धपिष्टे कपा
लोपधानं पिष्यमाणेषु निर्वपत्यन्ये महीनामित्याज्यं। धृष्टिरसीत्युप
वेषमादाय। ॐ धृष्टिरसि। अपाग्न इत्यंगारमग्राचः करोति। ॐ अपाग्ने अ
ग्निमामादं जहि निष्क्रव्यादꣳ सेध। आ देवयजमित्यंगारमाहृत्य। ॐ आ ४
देवयजं वह। कपालेनाच्छादयति। ध्रुवमसीति। ॐ ध्रुवमसि पृथिवीं

दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य वधाय। स
व्यांगुल्या पूर्वस्मिन्नंगारं निदधात्यग्ने ब्रह्मेति। ॐ अग्ने ब्रह्म गृभ्णीष्व। धरुणमिति
पश्चात्। ॐ धरुणमस्यंतरिक्षं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपद
धामि॥ समं विसृज्य दक्षिणत एवमुत्तरश्चित्स्थेति। ॐ चितस्थोर्ध्वचि
तः॥ ध॥ इत्याग्नेयोष्टाकपालः एवमेकादशाग्नीषोमीयस्याधिकं दक्षि
णतः। आ देवयजमिति सर्वत्र। एवमैंद्राग्नो द्वादशाकपालः। भृगूणामि
त्यंगारैरभ्यूहति। ॐ भृगूणामंगिरसां तपसा तप्यध्वं। यजमानो महीनां
पयोसीति। ॐ महीनां पयोसि। आज्यनिर्वापं करोति। वेदोसीति वेदं करोति
यजमानः। ॐ वेदोसि येन त्वं देव वेद देवेभ्यो वेदोभवस्तेन मह्यं वेदो भूयाः
ॐ व्यानाय त्वा दीर्घामिति कृष्णाजिनप्रोहति। ॐ दीर्घामनुप्रसितिमायुषे

५ धां देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्वच्छिद्रेण पाणिना। चक्षुषे त्वे
तीक्षते। ॐ चक्षुषे त्वा। पात्र्यां सपवित्रायां पिष्टान्यावपति देवस्य त्वेति ॐ
देवस्य त्वा० मांसं वपामि। अपणस्य पश्चादुपविश्य पुत्यंनवेदिवाउपसर्जनी
रानयत्यन्यः पवित्राभ्यां प्रतिगृह्णाति समापइति। ॐ समापऋषधीभिः समो
षधयो रसेन। सꣳ रेवतीर्जगतीभिः पृच्यन्ताꣳ सं मधुमतीभिः पृच्यन्तां। सं
योतिजनयत्यै त्वेति ॐ जनयत्यै त्वा संयौमि। पवित्रे स्थानेनिधाय। पुरोडाश
बंधनं। वेदिमध्ये त्वक्षी आचारा श्रुता वदानानि करोति। समं विनन्त्यास
७ ठꣳ हरिष्यन्नोन्नते। इदमग्नेरिदमग्नीषोमयोरिति यथादेवतमन्यत्। ॐ इद
मग्नेः। ॐ इदमग्नीषोमयोः। इति च्छेदनालंभः। इषे त्वे त्याज्यमधिश्रयत्यन्यः
ॐ इषे त्वा। अग्याज्यमधिश्रयति। घर्मोसीति पुरोडाशं युगपत्। ॐ घर्मो ५

सि विश्वायुः २ उरुप्रथा इति प्रथयति यावत्कपालमनति दघ्नं॥ ॐ उरुप्रथा
उरुप्रथस्वोरु ते यज्ञपतिः प्रथतां।२। अग्निष्टइत्यङ्गिरिन्मिद्धाति सकृत्त्रिर्वा॥ ॐ
अग्निष्टे त्वचं माहिꣳसीत्।२। पात्र्यांꣳ गुलिप्रक्षालनं। पर्यग्निकरोत्यंतरित
ꣳ रक्षोन्तरिता अरातय इति सहाज्यं॥ ॐ अन्तरितꣳ रक्षोन्तरिता अरातयः उ
० देवस्त्वेति श्रपणं। ॐ देवस्त्वा सविता श्रपयतु वर्षिष्ठेधिनाके।२। मा भेरि
त्यालभते। ॐ मा भेर्मा संविक्थाः२ अतमेरुरिति तृणानि वासयति भ
स्मना वेदेनोपवेषेण वा। ॐ अतमेरुर्यज्ञोतमेरुर्यजमानस्य प्रजा भूयात्।२।
आप्येभ्यो निनयत्यन्नित्यपउ त्वरतः। प्राचं खननं। प्रत्यंचं निनयनं। प्र
त्यग सꣳस्यंदमानं त्रितायत्वेति प्रतिमंत्रं। ॐ त्रिताय त्वा। ॐ द्विताय त्वा
। एकताय त्वा। अथ यजमानं। इदं त्रितायाप्याय नमम। इदं द्वितायाप्या

६ यनममा। ॐ एकतायाप्वायनममा। अन्वाहार्यंदक्षिणाग्नावधिश्रयति। तस्य
द्भिःप्रक्षालनं। वेदिमानं। अपरेणाहवनीयंवेदिंखनति। अंगुलखातांव्या
समामाग्नीपश्चात्। पा प्र० द्वि० त्रि० चतुर्थः। अरत्निंप्राचीं। प्र० द्वि० तृ० पुरस्ता
च्च। प्र० द्वि० तृ० मध्यसंगृहीतां। २। अग्निमग्नितो६ सो२ वेदिंपरिसमुह्यवि
हृत्यासोभ्युद्धरत्युत्करंकरोति। देवस्यत्वेतिस्फ्यमादायसव्यरणं। ॐ देवस्य
त्वा० स्माआददे धरस्थंतंदेवेभ्यः। सव्येनत्वादक्षिणेनालभ्यजपतीद्रस्यबा
हुरिति। ॐ इंद्रस्यबाहुरसिदक्षिणः सहस्रभृष्टिः शततेजावायुरसितिग्म
तेजाद्विषतोवधः। वेद्यांतृणंनिधायत्स्कंदक पृथिव्येवर्मासीति। ॐ पृथिव्ये
वर्मासि। पृथिवि देवयजनीतितृणांतर्हितेप्रहरति। ॐ पृथिवि देवयज
न्योषध्यास्तेमूलंमाहिंसिषं। व्रजंगछेतिपुरीषमादत्ते। ॐ व्रजंगछगो ६

ष्ठानं। वर्षतुतइतिवेदिंप्रेक्षते। ॐ वर्षतुतेद्यौः। बधानेत्युत्करेकरोति। ॐ
बधानदेवसवितः परमस्यांपृथिव्यां६ शतेनपाशैर्योस्मान्द्वेष्टियंचव
यंद्विष्मस्तमतोमौक्। अपाररुमितिद्वितीयंप्रहरणादि। ॐ अपाररुंपृ
थिव्यैदेवयजनाद्वध्यासं। उ० ॐ व्रजं० ॐ वर्ष० ॐ बधान०। अग्निन्दस्य
स्यग्रादुत्करमररोदिवमिति। ॐ अररोदिवंमापप्तः। उ०। द्रप्सस्तइतितृ
तीयं। ॐ द्रप्सस्तेद्यांमास्कन्। ॐ व्रजं० ॐ वर्ष०। ॐ बधान०। तूष्णींचतुर्थं।
सहरणं। ब्रह्मपूर्वंपरिग्रहंपरिग्रहीष्यामि। ॐ परिगृहाण। ब्रह्मा। दक्षिणतः
पश्चादुत्तरतश्चस्फ्येनगायत्रेणेतिप्रतिमंत्रं। ॐ गायत्रेणत्वाछंदसापरिगृ
ह्णामि। ॐ त्रैष्टुभेनत्वाछंदसापरिगृह्णामि। ॐ जागतेनत्वाछंदसापरिगृह्णा
मि। वेद्यांत्रिरुल्लिरव्याहहरत्रिरिति। ॐ हरत्रिः हत्वाग्नीत्स्रेखांपांसंभ

१ शाति। तूष्णीं स्फ्यमादाय खननं। अस्तम्भुत्तरं परिग्रहं परिग्रहीष्यामि। ॐ परि०।
सूक्ष्मास्योनोर्जस्वतीति पतति मंत्रं पूर्ववत्। ॐ सुक्ष्मा चासि शिवा चासि। ॐ स्यो
ना चासि सुखदा चासि। ॐ ऊर्जस्वती चासि पयस्वती च। पुराक्रूरस्ये
त्यनुमार्ष्टि। ॐ पुराक्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुं
यामैरयं चन्द्रमसि स्वधाभिस्तामु धीरासोऽअनुदिश्य यजन्ते। अध्वर्युर्वे
दिं प्रोक्षणीरिति यजमानः। अथ स्फ्यमुद्यम्याह प्रोक्षणीरासादये ध्मं बर्हिः
उपसादय स्रुचः स्रुवं सम्मृड्ढि पत्नीं संनह्याज्येनोदेहि। त्रिषतोवधइति स्फ्य
मुद्दंचं प्रहरति। ॐ त्रिषतोवधोसि। अवनिज्य पाणी अपरेण प्रणीता स्फ्यं
निदधाति इध्माबर्हिश्च। वेदास्याग्राणि मूलानि च अङ्गुष्ठाभ्यां छिघचरा
इत्वा स्फ्यं प्रतप्य पूर्ववत्। ॐ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः। उ० वेदस्यै १

रं तरतः प्राक्संमार्ष्टि निशितं इति विपर्यस्य बहिर्मूलैः। ॐ अनिशितो
सि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै संमार्ज्मि। २। ॐ प्रत्यु०। ॐ०। अनिशि
तेति स्रुचः प्रथमं जुहूं। ॐ अनिशितासि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै
संमार्ज्मि। प्रत्यु०। ॐ०। एवमुपभृतं। ध्रुवां च स्रुवं प्राशित्रहरणं स्ताव
दानं पुरोडाशपात्रीं इडापात्रीं चरस्थालीं वत्सेन मवतीति। समार्जनान्यपास्य
त्युत्करे। द्वि। पत्नीं संनह्यति प्रत्यग्दक्षिणतउपविष्टां गार्हपत्यस्य मुंज
योक्त्रेण त्रिवृता परिहरत्यधीवासो दित्यै रास्नेति। ॐ अदित्यै रास्नासि। द०
क्षिणं पाशमुत्तरेण प्रतिमुच्योद्धमुमृ इति विष्णोर्वेष्य इति। ॐ विष्णोर्वेष्यो
सि। नयग्रंथिं करोति। ऊर्जे त्वेत्याज्यमुद्रीक्षस्व। ॐ ऊर्जे त्वा। पत्नीमवेक्षयत्यप्र
धेनेति। ॐ पत्न्याज्यमवेक्षस्व। ॐ अदब्धेन त्वा चक्षुषावपश्यामि अग्नेर्जि

८ कासि सुहर्दैवेभ्यो धाम्नेमे वयजुषे यजुषे। वेद्यांकरोत्स परं प्रोक्षणीभ्यः। आ
ज्यं श्रः। सवितुस्त्वेत्याज्यमुत्पुनाति। ॐ सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण प
वित्रेण सूर्यस्य रश्मिभिः। प्रोक्षणीश्च पूर्ववत्। ॐ सवितुर्वः प्रसव उत्पुनाम्य
आज्यमवेक्षते तेजोसीति यजमानो वा। ॐ तेजोसि शुक्रमस्यमृतमसि। स्रुवे
णाज्यग्रहणं। चतुर्जुह्वां धामनामेति सकृन्मंत्रः। ॐ धामनामासि प्रियं देवाना
मनाधृष्टं देवयजनमसि। प्रथमः। द्वितीयः। तृतीयः। चतुर्थः। अष्टाउपभृ
त्यष्टौ यो नुयाजा ध्रुवेत्। ८। ध्रुवायां चतुर्जुहूवत्। ध। प्रणीतानिध्मं प्रोक्षिष्या
मि। ॐ प्रोक्ष। इध्मं प्रोक्षति विस्रस्य। कृष्णोसीति प्रतिमंत्रं। ॐ कृष्णोस्याख
रेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि। वेदिं च। वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि। बर्हिः
प्रतिगृह्याग्रं धान्त्। वेदामुदग्रं प्रेच्छत्वा। प्रणीतन बर्हिः प्रोक्षिष्यामि। ॐ प्रो ८

क्ष०। ॐ बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षिष्यामि। शेषं मूलेषूपसिंचयदि
त्यै व्युंदनमिति। ॐ अदित्यै व्युंदनमसि। पवित्रे निधाय प्रणीतासु। बर्हिर्वि
स्रंस्य पुरस्तात्। प्रस्तरग्रहणं विष्णोरिति। ॐ विष्णोस्तूपोसि। गृह्णीप्र
स्तरं ब्रह्मणे प्रदाय। संनहनं विस्रस्य। दक्षिणस्यां वेदिश्रोणौ निधाय
पूनकैरवच्छाद्य। वेदिं स्तृणा स्तुर्णम्रदस्यामिति त्रिवृतं। ॐ ऊर्णम्रदसं
त्वा स्तृणामि स्वासस्थं देवेभ्यः॥ द्वितीये विधृत्योर्ग्रहणं। तृतीये कृताद
नं। इध्मासमिधमादाया हवनीये कल्पयत्युपर्युपरि प्रस्तरं धारयन्नु
ष्मु केउ इहत्यनुयाजाध्वेत। ७। परिधीन्परिदधाति। मध्यमदक्षिणोत्तर
रान्। गंधर्वइति प्रतिमंत्रं। ॐ गंधर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारि
ष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः। इंद्रस्य बाहुरसि दक्षि

९ णोविष्णु०।ॐमित्रावरुणौत्वोत्तरतःपरिधत्तांध्रुवेणधर्मणाविश्वस्या०प्र
घमंपरिधिं॰समिधोपस्थउपवीतिहोत्रमित्यादधातितिष्ठन्समिधः।ॐवी
तिहोत्रंत्वाकवेद्युमंतं॰समिधीमहि।अग्नेबृहंतमध्वरेहोमः।अनुपस्थ॰
६ उपद्वितीयां॰समिद्दंस्याति।ॐसमिदसि।उपविश्य।सूर्यस्त्वेतिजपत्याह
वनीयमीक्षमाणः।ॐसूर्यस्त्वापुरस्तात्पा।उकस्याश्चिदभिशस्त्यै।आ
हृत्यवेदिंबर्हिषस्तृणोतिरश्चीनिदधातिसवितुरिति।ॐसवितुर्बाहूस्थः।त
योरुपरि॰स्तरणांस्तृणंर्णम्रदसमिति।ॐऊर्णाम्रदसंत्वास्तृणामिस्वासस्थं
देवेभ्यः।अग्निनिदधात्यात्वावसवइति।ॐआत्वावसवोरुद्राआदित्याः
सदंतु।तयोरुपरिअंजलिंनिदधाति।सव्यामहत्येजुहूंप्रतिगृह्यनिदधाति
घृताचीति।ॐघृताच्यसिजुहूर्नाम्नासेदंप्रियेणधाम्नाप्रियं॰सदआ ९

सीदएवमितरेउत्तरास्वप्रतिमंत्रं।ॐघृताच्यस्युपभृन्नाम्नासेदंप्रियेण॰
घृताच्यसिध्रुवनाम्ना०पुरोडाशविनिस्थिकरणं।आज्यस्थालिमुत्तर॰
तोनिधाय।तस्याउत्तरतःपुरोडाशपात्र्योस्थापनं।पुरोडाशावभिघार्यो
द्वास्योपस्तीर्णेनिधाय।तयोरुपस्तारस्थितयोरेवपुरोडाशयोरभिघारः
।स्रुत्यनांतुपूर्वेणोद्वासितानांत्रुष्टस्तोनीत्वाहवीष्युद्वासयेत्।ततःकपा
लसंख्याप्राणदानं।अनन्तं।ॐयस्तेप्राणःपशुषुप्रविष्टोदेवानांविष्ठा
मनुयोवितस्थे।आत्मनूवांक्षोसोमघृतवान्हिभूत्वाग्निंगच्छस्वर्यजमा
नायविंद।यथादेवतमन्यत।ॐयस्ते०भूत्वाग्नींषोमौगच्छ०।अमा०।त्व
त्वेंद्राग्नीगच्छ०।प्रत्यनन्तिकपालानिकपालात्यंजनं।तूष्णींसंख्ययो॰
द्वासयति।प्रथममुद्वासयामि।द्वितीय।तृतीय।चतुर्थ।पंचम।षष्ठासप्त।

१० ६ अष्टमदे नवम दशम। एकादश। द्वादशमु॰। प्रियेणधाम्नेतिहविर्भि
वेषांकृत्वा। ॐप्रियेणधाम्नाप्रियंसदआसीद। आज्यं। पुरोडाशे। ध्रुवा॰
आसदन्नितिसर्वान्यालभंते। ॐध्रुवाअसदन्नृतस्ययोनौता। विष्णोपा॰
हिपाहियज्ञंपाहियज्ञपतिं। आज्यस्थालीं घृतंजुहूपभृतिसर्वाण्याज्य
स्थालीविहायालभते। पाहिमामित्यात्मानं। ॐपाहिमांयज्ञन्यं। उ॰। यज
मानश्चहृष्टिरसिपाप्मानंमेदृश्चविधासिविधमेपाप्मानं। आचमनं।
अंतरेणापराग्निगत्वाअपरेणाहवनीयंप्राङ्तिष्ठन्ग्निमीक्षमाणो
पउपस्पृश्यव्रतमुपेत्यमंत्रेणपतइति। ॐअग्नेव्रतपतेव्रतंचरिष्यामि॰
छकेयंतन्मेराध्यतां। आहवनीयेसमिधमादधातियजमानः।। प्रथमो
ध्यायः।। ।। एहिहोतः। होतृषदनंकृत्वा।। परेणवेदिं श्रोणींवोत्तरेणे॰ १०

ध्मासमिधमादायाग्नयेसमिध्यमानायानुब्रूहि। ॐअग्नयेसमिध्यमाना॰
यानुब्रूहि। आमंत्रितोहोता। आचमनं। आगत्य। प्राणितोत्करावंत्रेणप्र
विश्येत। दक्षिणेनप्रपदेनबर्हिराक्रमणं। अग्नयेसमिध्यमानायानुब्रूहि
त्युक्ते। होताब्रह्मन्प्रमिधेनीरनुवक्ष्यामि। ॐअनुब्रूहि। ब्रह्मलोकंप्रपद्येतंप्र
पद्येयुक्तेप्रजापतेर्द्वारेणछंदस्तत्प्रपद्येयावत्तेविष्णोवेदतावत्तेकरिष्या
मिदेवेनसवित्राप्रसूतआर्त्विज्यंकरिष्यामिनमोग्नयउपद्रष्ट्रेनमोवायव
उपश्रोत्रेनमआदित्यायानुख्यात्रेजुष्टामद्यदेवेभ्योवाचंवदिष्यामिशु
श्रूषेण्यांमनुष्येभ्यःस्वधावतींपितृभ्यःप्रतिष्ठांविश्वस्मैभूतायप्रशा॰
स्तआत्मनाप्रजयापशुभिःप्रजापतिंप्रपद्येअयंनोअस्तुप्राजापत्यमनुव
क्ष्यामिवाणार्त्विज्यंकरिष्यतिवाचंप्रपद्येभूर्भुवःस्वः।। संतन्वंनिवमेत्र

११ हि। इदमहं पंचदशेन वज्रेण पाप्मानं भ्रातृव्यमवबाधे। यजमानः हिं ३।
प्रतिप्रणवमाधानं ६ समिधइति। प्राक्। उं प्रवो वाजा अभिद्यवो हविष्मंतो
घृताच्या। देवाञ्जिगाति सुम्नयो ३ त्रिः प्रथमं। अग्न आयाहि वितये गृणानो
हव्यदातये। निहोता सत्सि बर्हिषि ३ तं त्वा समिद्भिरंगिरो घृतेन वर्धयामसि
बृहच्छोचा यविष्ठ्य ३ स नः पृथु श्रवाय्यमच्छा देव विवाससि। बृहदग्ने सु
वीर्यं ३ ईळेन्यो नमस्यस्तिरस्तमांसि दर्शतः। समग्निरिध्यते वृषा ३ वृषो अ
ग्निः समिध्यतेऽश्वो न देववाहनः। तं हविष्मंत ईळते ३ वृषणं त्वा वयं वृषन्
वृषणः समिधीमहि। अग्ने दीद्यतं बृहत् ३ अग्निं दूतं वृणीमहे होतारं विश्व
वेदसं। अस्य यज्ञस्य सुक्रतुं ३ समिध्यमानो अध्वरे ऽग्निः पावक ईड्यः।
शोचिष्केशस्तमीमहे ३॥ अतः सर्वमिध्मैकवर्जमनुयाजार्थेत्। समि ११

धो अग्न आहुत देवान्यक्षि स्वध्वर। त्वं हि हव्यवाळसि ३ आजुहोता दुवस्यता
ग्निं प्रयत्यध्वरे। वृणीध्वं हव्यवाहनो ३ त्रिरुत्तमं। अग्ने महाँ असि ब्राह्मण भा
रत। यजमानस्य प्रवरार्षेयाण्याह। देवेद्धो मन्विद्ध ऋषिष्टुतो विप्रानुमदितः
कविशस्तो ब्रह्मसंशितो घृताहवनः। प्रणीर्यज्ञानां रथीरध्वराणामतूर्तो हो
ता तूर्णिर्हव्यवाट्। आस्पात्रं जुहूर्देवानां चमसो देवपानो रा इवाग्ने नेमिर्दे
वाँस्त्वं परिभूरसि। आवह देवान्यजमानाय। अग्निमग्न आ ३ वह। सोममा
३ वह। अग्निमा ३ वह। उपांशु। अग्नीषोमौ आ ३ वह। अग्नीषोमावा ३ वह
। अग्नीषोमावा ३ वह। इति पौर्णमास्यां। अमावास्यायां विष्णुं उपांशु
। आ ३ वह। इंद्राग्नी आ ३ वह। देवाँ आज्यपाँ आ ३ वह। अग्निं होत्राया ३ व
ह। स्वं महिमानमा ३ वह। आ च वह जातवेदः सुयजा च यज। आवा धेप

१२ विरूपोर्द्ध्वजानुर्दक्षिणेनप्रादेशेनभूमिमन्वारभ्यजपति।अस्यैप्रतिष्ठायैमा
छिक्षिपृथिविमातर्मामाहिंसीर्मामोदोषीर्मधुमनुष्येमधुजुनिष्पेमधुमती
मद्यदेवेभ्योयाचंवदिष्यष्पामिचारुंमनुष्येभ्यइदमहंपंचदशेनवज्रेण
पाप्मानंभ्रातृव्यमवबाधे।अनुवचनांतेवेदेनाइवनीयेत्रिरूपवाज्यस्त्रु
वेणप्रजापतयेस्वाहेति।ॐप्रजापतयेस्वाहा।इदंप्रजापतयेनममयजमा
नस्य।अग्निमग्निसमृष्टि।तौध्मसंनहनैरनुपरिधिसंमार्ध्यग्नेवाजजिदि
तित्रिस्त्रिःपरिक्रामं।ॐअग्नेवाजजिद्वाजंत्वासरिष्यंतंवाजजितꣳसंमा
र्ज्मिचत्वर्यलक्ष्मीमुपरि।अपरमाहवनीयादंजलिंकरोति।ॐनमोदेवेभ्यः
ॐस्वधापितृभ्यः।ॐ०।सुयमेमइतिजुहूपभृतावादायोत्तरांजुहूंकृत्वा
ॐसुयमेमेनूयास्तमस्कंनमद्यदेवेभ्यःआज्यꣳसंभ्रियासं।दक्षिणा १२

तिक्रामत्यंघ्रिणाविष्णविति।ॐअंघ्रिणाविष्णोमात्वावक्रमिषं।परिधीन
परेणासंचरोहोष्यतः।सव्येनेतोदक्षिणेनामुतोवसुमतीमित्यवस्थाय।
ॐवसुमतीमग्नेतेछायामुपस्थेषंविष्णोस्थानमसि।।१।।इतइंद्रइतिजुहो
त्सुचराघारं।ॐइतइंद्रोवीर्यमकृणोदूर्ध्वोध्वरआस्थात।अग्नेवेर्होत्रं
वेद्दूत्यमवतांत्वाद्यावापृथिवीअवत्वंद्यावापृथिवीस्विष्टकृद्देवेभ्यइं
द्रआज्येनहविषाभूत्स्वाहा।किंचिज्जुहोति।इदमिंद्रायनमम।अस
ꣳस्पृशयित्स्रुचावेत्यजुह्वाध्रुवाꣳसमनक्तिसंज्योतिषेति।ॐसंज्योति
षाज्योतिः।निधाय।स्रुचौनत्सौ।इतरांवेदोपयहेण।स्पृशामिध्मसंनह
नानिचादायाहवनीयादुत्तरतःस्थित्वा।।ॐ३श्रा३वय।अस्तुश्रौष
ट्।अग्निर्देवोदैव्योहोतादेवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वद्भरतवत्।

१३ यजमानस्य प्रवरानाह। अग्निरावद्राचवक्षत्रालणा अस्यय[ज्ञ]स्य प्रावि-
तारः। अमुकशर्मा होता मानुषः। ॐ देवसवितरेतं त्वा वृणते सह पित्रा वै-
श्वानरेण। ॐ पूषन्बृहस्पते प्रचवद प्रचयज वसूनां रातौ स्याम रुद्राणामोम्या
यां स्वादित्या अदितये अनेहसो यद्वृहोतर्वूर्यं जितं च ... परापतात्। अ
ग्निष्टत्पुनराभराज्जातवेदा विचर्षणिः। उपोत्थाय अध्वर्योर्दक्षिणेन प्रादे
शेन दक्षिणमंसमन्वारभ्य जपति। सवनाग्नि ओ दक्षिणं। ॐ इदमन्वारभ्याम
हे होतर्वूर्यं पुरोहितं। येनायन्नुत्तमं स्वर्देवा अंगिरसो दिवं। ... अध्वर्यू
नवति अपाद्य अन्तरा द्यावापृथिवी विवृत्ताः। सिनंति पाकमाधिधीरये
मिस्यो नेमे द्यावापृथिवी उन्नेडमे। ... पांतु द्यौश्च पृथिवी चा
हश्च रात्रिश्चापश्चौषधयश्च। ऐंद्रीमावृतमावर्ते आदित्यस्यावृतमन्वाव १३

र्ते। दक्षिणं बाहुमन्वावृत्य। ॐ निरस्तः परावसुर्येस्मां द्वेष्टि यं च वयं द्विष्मः
स्तेन सह। होतृषदनात् तृणमुन्नयतः प्रतिष्ठिद्य। दक्षिणापरमवांतर्देशं नि
रस्य। अप उपस्पृश्य। अपशुष्कमुदगाग्रं निधाय। ॐ इदमहमर्वावसोः सदसि
सीदामीत्युपविश्य। दक्षिणोत्तरिणामुपस्थं कृत्वा। प्रांचोपाणी प्रगृह्य जपति
। ॐ नमो द्यावापृथिवीभ्यां होतर्मा पूर्वस्म्याः विश्वकर्मणो तनूपा मे स्थस्त
न्वं मे मे पातं मा मा हिंसिष्टं मा मा संताप्तं। आहवनीयं प्रेक्ष्य। गार्हपत्यं च। उद
कं संस्पृश्य। एषवामाकामाः। विश्वेदेवाः शास्तन मा यथेह होता वृतो मन
वै यन्निषद्य। प्रमे ब्रूत भागधेयं यथा वो येन पथा हव्यमावो वहानि। तदद्यवा
चः प्रथमं मसीय येनासुराँ अभिदेवा असाम। ऊर्जाद उत यज्ञियासः
पंचजना मम होत्रं जुषध्वं। नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नः

१४ मन्त्राग्निनेत्रः। यजामदेवान्यदिन्नाक्रवाममाज्यायसः शंसमाहमिदेवाः।
अग्निर्होतेति स्रुग्गादापनं। ॐ अग्निर्होतावेत्वग्निर्होत्रंवेत्त्वप्रावित्रंसाधुतेय
जमानदेवता। योग्निहोतारमवृथाः। उत्युपांशु घृतवतीमध्वर्योस्रुचमा
स्यस्वदेवयुवंविश्ववारामीळामहैदेवाँईळेन्यान्नमस्यामनमस्यान्यजा
मयज्ञियान्। अध्वर्युः। घृतवतीमित्युक्तेस्रुवादायातिक्रम्याश्राव्याहस
मिधोयजेति। पंचप्रयाजान्समिधनमे। ॐ३ आ३वय। अस्तुश्रौषट्। स
मिधोयज। ॐ भूर्भुवः। येयजामहे। समिधः समिधोऽग्नआज्यस्यव्यंतुवौ३
षट्। ऊर्जः सहः सह ऊर्जस्वः। इदं समिद्भ्यो न मम। एकोमम। एकातस्ययो
स्मांद्वेष्टियंचवयंद्विष्मः। त्विषिमान्भूयासं। ॐ ३ आ३वय। अस्तु॰ यजय १४
जेतिशेषंयज। भू॰ येय॰। तनूनपादग्नआज्यस्यवेतुवौषट्। ऊर्जंस॰।

इदंतनूनपातेनमम। द्वौ॰ द्वे॰ ष्म॰। अपचितिमान्भूयासं। ॐ आ३वय। अस्तु॰
। यज भू॰। ये॰ह। इडोऽग्नआज्यस्यव्यंतु३वौषट्। ऊर्जः॰। इदमिड्भ्यो
॰। त्रयोममत्रिभ्यस्तस्ययो॰ यशस्वीभूयासं। उपभृतोजुह्वामानयत्यनेन
चदर्शे मन्त्रेणेत्यत्रचतुर्थेप्रयाजेसमानयनं। ॐ॰ आ॰ यज। भू॰ ये॰ ह। बर्हिरग्नआज्यस्य
वेतु३वौ॰। ऊ॰। इदंबर्हिषेनमम। चत्वारोमम। चतस्रस्तस्ययो॰। प्रजाव
वैसीभूयासं। ॐ॰ अ॰ यज। भू॰ ये॰ह। स्वाहाग्निंस्वाहासोमंस्वाहाग्निंस्वाहा।
उपांशु अग्नीषोमौ। स्वाहाग्नीषोमौस्वाहादेवाँआज्यपाँजुषाणाअग्नआज्य
स्यहविषोव्यंतु३वौषट्। ऊर्जः स॰। इदमग्नयेसोमायाग्नयेऽग्नीषोमाभ्याम
ग्नीषोमाभ्यांदेवेभ्यआज्यपेभ्योनमम। पंचममनतस्यकिंचनयो॰ श्म॰ अ॰प
वादोभूयासं। अमावास्यायां। ॐ॰। अ॰। यज भू॰ ये॰हे। स्वाहाग्निंस्वाहा

१५ सोमंस्वाहाग्निंस्वाहा।उपांशु।विष्णुंस्वाहेंद्राग्नीस्वाहादेवाआज्यपाजुषा॰
णाअग्नआज्यस्यहविषोवेतु३वौषट्।इदमग्नयेसोमाय।अग्नयेविस्सवद्दं
ग्निस्वांदेवे॰सं॥इत्याज्यभागौ।निधायलोकवायाइविषउपस्तरणम्।आज्य
भागास्वांचरुस्यायेयेनसोम्येन।अग्नयेनुब्रूहि।अग्निर्वृत्राणि।त्वंसोमासि
सत्पतिरित्याज्यभागौ।वार्त्रघ्नौपौर्णमास्यां।अग्निर्वृत्राणिजंघनत्द्रवि
णस्युर्विपन्यया।समिद्धःशुक्रआहुतो३पुरो॰।अवदायावदायध्रुवा
मभिघारयत्याप्यायतामितिध्रुवायाःप्रथमः।ॐआप्यायतांध्रुवायाहवि
षाघृतेनयज्ञंयज्ञंप्रतिदेवयद्भ्यः।सूर्यायाऊधोअदित्याउपस्थउरु
धारापृथिवीयज्ञेअस्मिन्द्वितीयः।ॐआप्यायतांतृतीयः।ॐआप्याय
तांचतुर्थः।ॐआप्यायतां॰तृ।ॐ॰।अ॰।अग्निंयज।तृ॰।ये॰हे।ग्निंजुषा १५

णो।अग्निराज्यस्यहविषोवेतु३वौषट्।ॐज॰।इदमग्नयेनमम।आ
ग्नेयमुत्तरपूर्वार्द्धे।सोमायानुब्रूहि।त्वंसोमासिसत्पतिस्त्वंराजोतवृत्र
हा।त्वंभद्रोअसिक्रतुः३।आप्यायतां॰४।ॐ॰।अ॰।सोमंयज।तृ॰।ये॰
हे।सोमंजुषाणःसोमआज्यस्यहविषोवेतु४वौषट्।ॐज॰।इदं
सोमायनमम।दक्षिणपूर्वार्द्धेसौम्यं।अग्निःप्रत्नेनसोमगीर्भिरित्यमा
वास्यायांवृधन्वंतौ।अग्नयेनुब्रूहि।ॐअग्निःप्रत्नेनमन्मनाशुंभानस्तन्वं
स्वां।कविर्विप्रेणवावृधे३।आ॰४।ॐ॰।अ॰।अग्निंयज।तृ॰।ये॰हे।ग्निंजु
षाणो॰।सोमायानुब्रूहि।ॐसोमगीर्भिष्ट्वावयंवर्धयामोवचोविदः।सुमृ
ळीकोनआविश३।आ॰४।ॐ॰।अ॰।सोमं॰।तृ॰।ये॰ये॰।सोमंजु॰।अग्न
येनुब्रूहि।ॐअग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं।अपांरेतांसिजि

१९ न्वतो॥ आ० मध्यात्पूर्वार्धाच्चासंभिंदन्नंगुष्ठपर्वमात्रमवदानमाज्य
वत्दधिपयसोरा घृतयोराज्यं। अवदाय प्रत्यभिघारणं। प्राक्स्विष्टकृ-
तः। उ०। अ०। अग्निंयज। हू०। ये० हे। अग्निंनुवोपूज्यस्पर जसख्यो नेता यज्ञानि
युड्भिः सचसे शिवाभिः। दिविमूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवा
हा वौ३षट्। उंज०: समिद्धमग्ने वाह विर्मोच। इदमग्नये० पुरोडाशावंतरे
णाग्नीषोमावुपांशु आज्यस्य। अग्नीषोमाभ्यामुपांशु अनुब्रूहि उच्चैः। उ
पांशु पुरोनुवाक्या॥ अग्नीषोमाविमं सुमे शृणुतं वृषणा वहं। प्रतिसूक्ता
निहर्यतं नवतं दाशुषे मयः। उं३ मुच्चैः। आप्यायता०। ४। उ०। अस्तु०। अ
ग्नीषोमौ उपांशु। यज उच्चैः। हू०। ये० हे। अग्निषोमौ जुषाणा वग्नीषोमा-
वाज्यस्य हविषो वीतां उच्चै० वौ३षट्। उंज०:। इदमग्नीषोमाभ्यां न मम। १९

अग्नीषोमाभ्यामनुब्रूहि। अग्नीषोमा सवेदसा सहूती वनतं गिरः। संदेव
त्रा बभूवथुः। आप्या०। एक१ अवदानद्वयं पुनः एकस्तन्मंगः। उं३ आ०
अस्तु०। अग्नीषोमौ यज। हू०। ये० हे। अग्नीषोमौ युवमेतानि दिवि रोचनान्य
ग्निश्च सोम सक्रतू अधत्तं। युवं सिंधूंरभिशस्तेरवद्यादग्नीषोमावमुंचतं-
गृभीतान्। वौ३षट्। उंज:। इदमग्नीषोमाभ्यां न मम। अमावास्यायां।
विष्णुर्वामावास्यायामैंद्रो होत्राम्नानात्। विष्णवे उपांशु। अनुब्रूहि उच्चैः
। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूळ्हमस्य पांसुरे। उपांशु। उं३ मु
उच्चैः। आप्या४। उं०। अ० विष्णुं०। यज उच्चैः। हू०। उ०। ये० हे उच्चैः
। विष्णुं उ० वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं
वर्धंतु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः। उ०। वौ३। उच्चैः।

१७ ।इदं विष्णवे न मम ।इंद्राग्नीभ्यामनुब्रूहि ।इंद्राग्नी आगवसागतमस्मभ्यं चर्ष-
णीसहा ।मानो दुःशंस ईशत ।२। आ० ।उ० ।आ० ।इंद्राग्नी यज ।न्यू०।ये०।हा ।इंद्रा
ग्नी प्रचर्षणिभ्यः पृतनासुहवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।प्रसिंधुभ्यः प्रगिरि
भ्यो महित्वा प्रेंद्राग्नी विश्वा भुवनात्यन्या ।धवौ ध षट् ।जु०। ।इदमिंद्राग्निभ्यां
न मम ।अग्नये स्विष्टकृतेनुब्रूहि ।पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूंर् ऋ
तुपते यजेह ।येदैव्या ऋत्विजस्तेभिरग्ने त्वं होतृणामस्यायजिष्ठो ।२। आप्या०
।याकृविहूतराः स्विष्टकृलस्तन गवहोमोनाज्याद ग्रोपात ।क्षिप्रा मिथार
णी ।स्रुव१ अवदान१ स्रुव२ सताभ्यंगोन ।तु०।सु०। अग्निं स्विष्टकृ
तं यज ।न्यू०।ये०।हे ।ग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया धामान्ययाट् सोम
स्य प्रिया धामान्ययाळग्नेः प्रियाधामान्ययाट् ।अग्नीषोमयोः उपां० १७

प्रिया धामान्ययाळग्नीषोमयोः प्रियाधामान्ययाड् देवानामाज्यपानां
प्रियाधामानि यक्षदग्नेर्होतुः प्रियाधामानि यक्षत्स्वं महिमानमायजतामेज्या
इषः कृणोतु सो अध्वरा जातवेदा जुषतां हविः ।अग्ने यदद्य विशो अध्वर
स्य होतः पावकशोचे वेष्ट्वं हि यज्वा ।ऋता यजासि महिना वि यद्भूर्हव्या वह
यविष्ठ या ते अद्य ।३। वौ० ।० उज० ।उ० इदमग्नये स्विष्टकृते न मम ।पौ
र्णमास्यां विष्णो ।उपांशु ।प्रियाधामान्ययाळिंद्राग्न्योः प्रियाधामान्ययाट्
हे० ।उदकोपस्पर्शनं ।३। सर्वेषां ।संचरमनुष्य ।प्राशित्रमवद्यतिय वमा
त्रं पिप्पलमात्रं वा अध्वर्युः संचरेण ब्रह्मणे प्रदाय ।मित्रस्य त्वा चक्षुषा प्रती
क्ष इति प्राशित्रं प्रतीक्षेत ।ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे ।देवस्य त्वेति प्रति
गृह्णाति ।ॐ देवस्य त्वा० ।म्यां प्रतिगृह्णामि ।अग्नेष्ट्वा बर्हिषि पिपिं पृथि०

१८ ब्यास्त्वेति सादयति। ॐ पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे। पुनरा
दायदेवस्य त्वेस नामिकांगुष्ठाभ्यामग्ने ष्ट्वेति प्राश्नाति। ॐ अग्ने ष्ट्वास्येन प्राश्ना
मि। दंतैरनुपस्पृशन् न्यूनत्रयचेन्निदधाति वा। ॐ सदेवोप प्रक्षाल्य पात्रेनाभिमामृजते
।यान्नेप्स्वंतर्देव नास्ता दर्ण ॐ समयंत्रु स्वाहा कृतं जगदस्मिंद्रस्य गच्छ स्वसिना
मेमासंसृष्ट कृत्वा ऊर्ध्वमेनानेःसिदेंद्रस्य त्वाऽजठरे सादयामि। इडां पंचावत्तां द
क्षिणतो मध्याच्च। यावत्कृविः स्विष्टकृदाज्यं यजमानभागमाग्नेयाद्देव। पू
र्वार्द्धादीर्घं प्रसार्य पुरस्तात् धृत्वाया: करोति। प्रथमं त्र्यस्नात्तागं धृत्वोपरिमु
त्का। इडां ॐ होत्रे प्रदाय। आविसर्जं दक्षिणातिक्रामति। इडां प्रतिगृह्य। हो
तरंगुली पर्वणि। अनक्ति। उत्तमे पर्वणि मध्यमे च। वाचस्पतिना ते हुतस्य
प्राश्नामीषे प्राणाय। मनसस्पतिना ते हुतस्य प्राश्नाम्यूर्ज उदानाय। स्व १९

वांतरेडामादधाति। होत्रे हस्ते। प्र० द्वि० तृ० च० स्वयं पंचममादाय मुख
संमितां धारयन् हृदयसंमितां वा। इडां च सर्वे न्वारभंते। उपहूतं बृहत्सह दि
वा सह सूर्येण सह चक्षुषोपमां बृहत्सह दिवा सह सूर्येण सह चक्षुषा ह्वय
तामुपहूतं वामदेव्यं सहांतरिक्षेण सह वायुना सह प्राणेनोपमां वामदेव्यं स
हांतरिक्षेण सह वायुना सह प्राणेन ह्वयतामुपहूतं रथंतरं सह पृथिव्या स
हाग्निना सह वाचा सह उपश्रुतिरुपमां रथंतरं सह पृथिव्या सहाग्निना सह वा
चोपह उपश्रुतिर्ह्वयतामुपहूतं स्तोमं स्तुतवनमुपमां स्तोम स्तुतवनं ह्वयतामु
पहूतं चरिक्षत्तुवनमुपमां चरिक्षत्तुवनं ह्वयतामुपहूताः सखाय उप
उपमां सखायः ह्वयतामुपहूताः सप्तहोत्रा उपमां सप्तहोत्रा ह्वयंता
मुपहूता गावः सहाशिरोपमां गावः सहाशिरा ह्वयंतामुपहूता धेनुः

१९ सहऋषभो पमां धेनुः सहऋषभा ह्वयतामुपहूता वाक्सहप्राणेनोपमां
वाक्सहप्राणेन ह्वयतामुपहूता वाक्सहमनसोपमां वाक्सहमनसा ह्वयता
मुपहूतेलाचृष्टिरुपमामिलाचृष्टिर्ह्वयतामुपहूतेलान्तुरिरुपमामिलान्तु
रिर्ह्वयतामुपहूता हेसासिजुषस्वमेलो। उच्चैस्तरां। इलो पहूतो हूतेलो पा
स्मां इला ह्वयतामिलोपहूता मानवी घृतपदी मैत्रावरुणी ब्रह्मदेवकृतउपहू
तं दैव्या अध्वर्यव उपहूता उपहूता मनुष्या यइमं यज्ञमवान्ये च यज्ञपतिं व
र्धान्। द्यावापृथिव्योरुपह्वानेग्नीध्रे स्वउपवत्ते। उपहूते द्यावापृथिवी पूर्वजे ऋ
तावरी देवी देवपुत्रे। उपहूतोयं यजमान उत्तरस्यां देवयज्यायामुपहूतो
पस्मिह विष्करणाइदं मे देवा हविर्जुषंतामिति तस्मिन्नुपहूतः॥ अवघ्रा
पइडां निदधाति। ॐ वर्च्च पिन्वस्वायुर्मे धुक्ष्व प्रजां मे धुक्ष्व पशून्मे धुक्ष्व १९

ब्रह्म मे धुक्ष्व क्षत्रं मे धुक्ष्व। २। विशो मे धुक्ष्व यो स्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य
प्रजया पशुभिराप्यायस्व। मयीदमिंद्र इंद्रियं दधात्वस्मान्रायो मघवानः स
चंतां। अस्माकं संत्वाशिषः॥ सत्या नः संत्वाशिषः॥ इदं ब्रह्मणः इदं होतुः इ
दमध्वर्योः इदमाग्नीध्रस्य। अपसव्यं। ॐ अत्र पितरो मादयध्वं यथाभागं पि
तर आवृषायध्वं। उ०। अमीमदंत पितरो यथाभागमवीवृषत। सव्यं। उ०
इति पिंडं च धाय। इदं ब्रह्मणे। इदं होत्रे। इदमध्वर्यवे। इदमग्नीधे। उपहूतां प्रा
श्नंति यजमानश्च। षडवत्तं। प्राश्नात्युपहूता पृथिवी मातेति। ॐ उपहूता पृ
थिवी मातोप मां पृथिवी माता ह्वयतामग्निराग्नीध्रात्स्वाहा। प्रतिप्रस्थाणं च
मनं। ॐ उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात्स्वाहा॥ आ
मामं चाग्नेयावरुपहूतनाम ह्वयं पृ ष्ठः। आग्नीध्रः प्राश्नाति। प्रतिमंत्रमेके

२० कः। ततः स्वगाग्राशनं॥ ततः इडाप्राशनं। ततो होतुर्जपमंत्रः। ॐ। इडासि स्यो
नासि स्योन कृत्स्नान सुप्रजास्ते रायस्पोषे धाः॥ जुष्टे जुष्टिं ते गमेय उपहूत उप
हवं ते शीय। मुखस्य त्वा घ्रत्नाय सुरभ्यास्य त्वाय प्राश्नामि। उत्तरे लोमाश्य। इ
तरां यजमानः पंचमाप्राश्नीयुः। आमार्जना द्यप्यमनं सर्वेषां। इदमापः हि।
दवेन ततः अंतर्वेदि पवित्रवती मार्जयंते। पवित्रयोर्मार्जयंते। अपरेण वे
दिं सुमित्रियान इति। इदमापः प्रवह० ऋक ३ मंत्र ८ यस्मात्कर्म यस्माकमि
ति। ॐ सुमित्रिया न आप ओषधयः संतु। यजमानस्य प्राणापानौ पातमिति प्रस्त
रे ते करोति। ॐ यजमानस्य प्राणापानौ पातं। जाम मस्मे परिहरति। इदं ब्रह्मणे
। इदं यजमानाय। यजमानभागं चाप्रोषिते। प्रोषिते तु। समिद्य यजुषा सह हे त्र
हेत्वर्समी तिमंत्रेण भागं जुहोति। अन्वाहार्यमनिधायोर्द्धास्यां तरा ब्रह्मय २०

जमानो हृत्वा वेद्यां निधायालभते। ॐ प्रजापतेर्भागोस्यूर्जस्वान्पयस्वान्प्रा
णापानौ मे पाहि समानव्यानौ मे पाहि उदानव्यानौ मे पाहि। उर्गस्यूर्जं मयि धेहि अ
क्षितिरसि मा मे क्षेष्ठाः। अमुत्रामुष्मिंलोके इह च। अथ यजमानः प्रजापते
र्भागोस्यूर्जस्वान्पयस्वान। क्षितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिंलोके इह च।
अस्याः इष्टे समध्वर्यं अन्वाहार्ये दक्षिणा ब्रह्मादिभ्यः कल्पितमोदं संप्रददे। ब्र
ह्मन्हे सेनागः संप्रतिगृह्णातो। होतर्यः। अध्वर्योय०। आग्नीध्रा० ब्रह्मा। ॐ प्रजा
पतये त्वा मह्यं वरुणो ददातु सोमृतत्वमशीय। प्राणो दात्र एधि मयो मह्यं प्रतिग्र
हीत्रे। कोदात्कस्मा अदात्कामोदात्कामायादात्कामो दाता कामः प्रतिग्रही-
ता कामैतत्ते। एवमेव होता। अध्वर्युः। द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु।
अग्नि। सा दक्षिणो दगुद्वासयति हविर्ब्रह्म। समस्यो न्मुकोसमि धमादायाह

२१ ।ब्रह्मन्प्रस्थास्यामिसमिधमाधायाग्निमग्नीत्संमृड्ढि।द्वि।ॐदेवसवितरेतत्ते
यज्ञंप्राहबृहस्पतयेब्रह्मणे।तेनयज्ञमवतेनयज्ञपतिंतेनमामव।देवेनसवित्रा
प्रसूतः।ॐप्रतिष्ठ।ब्रह्माप्रवदति।एषाऽऽगतिहोतानुमंत्रयते।ॐएषातेअग्नेसमित्त
यावर्धस्वचाचप्यायस्व।वर्धिषीमहिचवयमाचप्यासिषीमहि।संमार्ष्टिपूर्वव
त्परिधीमठं सकृत्सकृत्सर्ववाठं समिति।ॐअग्नेवाजजिद्वाजंत्वासस्वाठं सं
वाजजितठं संमार्ज्मि।ब्रह्मानुज्ञातोनुयाजेस्विष्टिकृद्ध्यरत्योपभृतठं समानीय॥
अतिक्रम्याश्राव्याहदेवान्यजेति।उत्तरेणप्रतीचोजुहोति।ॐश्रा०अ०देवान्
जनद्भुवः।देवंबर्हिर्वसुवनेवसुधेयस्यवेतुध्यौषट्।ॐइदंदेवायबर्हिषे
०ॐश्रा०अ०देवोन०देवोनराशंसोवसुवनेवसुधेयस्यवेतुध्यौषट्॥
इदंदेवायनराशंसाय०ॐश्राव०अ०देवो[illegible]न०।देवोअग्निःस्विष्ट २१

जुहूपभृतोव्यूहति ५

कृत्सुद्रविणामंद्रःकविःसत्यमन्मायजीहोताहोतुर्होतुरायजीयानग्नेयांदेवान
याड्यांअपिप्रेयेतिहोचेक्षमन्नत।तांससनुषीहोत्रांदेवंगमांदिविदेवेषुयज्ञमे
रयेमंस्विष्टकृत्त्वाग्नेहोताभू०वसुवनेवसुधेयस्यनमोवाके।वीह्यवौषष
ट्।ॐइदंदेवायाग्नयेस्विष्टकृतेनमम।उपविश्य।उपभृतंसमानीयकृत्वाजुहोति।दे
वेभ्यःस्वाहा।इदंदेवेभ्योनमम॥अध्वर्युवा।ॐअग्नेरग्नीषोमयोरग्नीषोमयोरुज्जि
तिमन्नुज्जयत्वर्यंयजमानोवाजस्यैनंप्रसवेनप्रोहामि।जुहूंप्राचींदक्षिणेनो
त्तरेण।ॐअग्निरग्नीषोमावग्नीषोमौतमपनुदंतुयमयंयजमानोद्वेष्टियश्चैनंद्वे
ष्टिवाजस्यैनंप्रसवेनापोहामि।यज०॥अग्नेरग्नीषोमयोरग्नीषोमयोरुज्जि
तिमनूज्जेषंवाजस्यमाप्रसवेनप्रोहामि।ॐअग्निरग्नीषोमावग्नीषोमौतमप
नुदंतांयोस्मान्द्वेष्टियंचवयंद्विष्मोवाजस्यैनंप्रसवेनापोहामि।अस्माक

स्पायां। अध्वर्युर्वामा॰। ॐ अग्ने र्विष्णो रिन्द्राग्नोरुज्जितिमनूय त्वयं यजमानो वा
वस्येनं प्रसवेन प्रोहामि। ॐ अग्निर्विष्णु रिन्द्राग्नीतमप नुदंतु यम यं यजमा॰
नो द्वेष्टि यश्चैनं द्वेष्टि वाजस्येनं प्रसवेनापोहामि। यजु॰। ॐ अग्ने र्विष्णो रिन्द्राग्नो
रुज्जिति॰। ॐ अग्निर्विष्णुरिन्द्राग्नीतमनुदंतां यो॰। सव्येन तरां नीचा प्रतीची। अ
न्तः स्पस्य चोजुह्वा परिधीन नक्तिय यापूर्वं वसुभ्य इति प्रतिमंत्रं ॐ वसुभ्यस्त्वा॥
ॐ रुद्रेभ्यस्त्वा। ॐ आदित्येभ्यस्त्वा। स्पश मिध्म संनहना निचादाय। ह्मि छमेव प्र
थमं परिधिं गृहीत्वा आसीनाववाह। ॐ रश्मा रवय। अ॰। रुषितादैव्या हो॰
तारोभद्रवाच्याय प्रेषितो मानुषः स्क्तवाकाय सूक्ता ब्रूहि। संजानाथां द्यावा मि
ति प्रस्तादानं पवित्राभ्यां सह। ॐ संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा
वृष्ट्यावतां। विधृती स्थाने कृत्वा। अनक्तेनं व्यंतु वय इति। ॐ व्यंतु वयो क्त रिहि   २२

हाणाः इति सर्वत्र अयं जुक्ता उपन्तिमध्य। मस्तं ध्रुवायां मरुतामिति नीचैर्हृ
त्वा। ॐ मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह। ए
कं तृणं पृथक्‌ वामहस्तेन गृहीत्वा। इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवा
कमुत नमोवाकम्‌ ध्यास्म सूक्तोच्यमग्ने त्वं सूक्तवागसि उपश्रुती दिवि
स्पृथिव्योरोमण्वती ते अस्मिन्यज्ञे यजमान द्यावापृथिवी वास्तां शंगया
जीरदानू अत्रस्नू अपरे उरुगव्यूती अभयं कृतौ वृष्टिद्यावारीत्यापा
शंभुवौ मयोभुवा ऊर्जस्वती पयस्वती सूपचरणा च स्वधिचरणा च तयो
राविदि। अग्निरिदं हविरजुषतावीवृधत महोज्यायोकृत सोमो हविरजु॰। अ
ग्निरिदं॰। अग्नीषोमेदं पातु। इदं हविरजुषेतामवीवृधेतां महोज्यायोक्रातां॰
अग्नीषोमो हविरजुषेतामवीवृधेतां महोज्यायोक्रातां देवा आज्यपा आ

श्री ८

२३ ज्यमजुषंताबीवृधंत महो ज्यायोऽक्रत। अग्निर्होत्रेणेदं हविरजुषताबीवृधत महो
ज्यायोऽकृत। अमावास्यायां विष्णुः। उ०। अवि०। इन्द्राग्नी० जुषे०। [illegible]गां क्रा
अस्यामृधद्धोत्रायां देवंगमायामाशास्तेयं यजमानः। अमुकशर्मा। अमुक
शर्मोत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते आयुराशास्ते सुप्रजा
स्त्वमाशास्ते दिव्यं धामाशास्ते। यदनेन हविषाशास्ते तदश्यात्तदृध्यात्तदस्मै
देवा रासंतां तदग्निर्देवो देवेभ्यो वनुतां वयमग्नेः परि मानुषाः॥ इष्टं च वीतं
चाभूदुभे चैनं द्यावापृथिवी अंहसः पातामेह गतिर्वामस्येदं च नमो देवे
भ्यः। नम उपेति बर्हिष्यंजलिं निधाय जपति। नमो देवेभ्य इत्युक्ते। प्रस्तरं जुहो
ति। इदमग्नये सोमायाग्नये अग्नीषोमाभ्यामग्नीषोमाभ्यां देवेभ्य आज्यपेभ्यो
ग्नये होत्राय न मम। प्रस्तरेऽनुप्रहृतेऽग्नीदाह। अनुप्रहर। प्रास्तरं। चक्षु २३

ष्पा इत्याह न माजनते ध्वर्युः। ॐ चक्षुष्पा अग्नेसि चक्षुर्मे पाहि। उ०। संवदस्व
त्यग्नीत्। अगानग्नीत्। इत्यध्वर्युः। अगान्। इत्यग्नी। श्रावय। अस्तु श्रौषट् अग्नी
ग्नी०। स्वगा दैव्या होतृभ्यः। स्वस्तिर्मानुषेभ्यः। शंयोर्ब्रूहि। होता। तच्छंयोरावृणी
महे गातुं यज्ञाय गातुं यज्ञपतये दैवीः स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगा
तु भेषजं शंनो अस्तु द्विपदे शं चतुष्पदे। परिधिमनुप्रहरति। यं परिधिमिति प्रथ
मं। ॐ यं परिधिं पर्यधत्था अग्ने देवपणिभिर्गुह्यमानः। तं त एतमनुजोषं भरा
म्येष नेत्त्वदपचेतयातै। इति प्रथमं प्रास्यति। इतरौ च युगपदग्नेः प्रियमि
ति। ॐ अग्नेः प्रियं पाथोऽपीतं सं स्रावभागा इति सं स्रावं जुहोति। ॐ सं स्रा
वभागास्थेषा बृहंतः प्रस्तरेष्ठाः परिधेयाश्च देवाः इमां वाचमभिविश्वे गृणंत
आसद्यास्मिन्बर्हिषि मादयध्वं स्वाहा। वा०। इदं विश्वेभ्यो देवेभ्यो न मम

२५ घृताचीइति धुरि निदधात्यनसि चेद्ध्रुवं स्पृपात्र्यां चे। ॐ घृताची स्थो धुर्यौ पा
तं सुम्ने स्थः सुम्ने मा धत्तं। यज्ञ नमश्च त इति वेदिमालभते। यजमानः। ॐ यज्ञ
नमश्च त उप च यज्ञस्य शिवे संतिष्ठस्व स्विष्टे मे संतिष्ठस्व। वेदं होता। स्रुक्स्रुव
मध्वर्युः। आज्यस्थालीमाग्नीध्रादाय। पत्नीसंयाजेष्वउपांशु। गार्हपत्ये संया
जैश्चरंति। अध्वर्युः पूर्वदक्षिणेन गार्हपत्यमेत्य तु पविश्य दक्षिणां जानु वाच्यै
वं सर्वत्रोपविष्टहोमेषु॥ सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमिति जप
ति। सोमायानुब्रूहि। आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं। भवा वाजस्य
संगथे॥ चतुर्गृहीतमाज्यं गृहीत्वा। ओं श्रा० अ०। सोमं यज। नृ०ये०हे। सो
मं सं ते पयांसि समु यंतु वाजाः सं वृष्ण्यान्यभिमातिषाहः। आप्यायमानो
अमृताय सोम दिवि श्रवांस्युत्तमानि। धिष्व। वौषट्। इदं सोमाय०। त्वष्टा २५

नुब्रूहि। इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये। अस्माकमस्तु केवलः। ॐ० श्रा०
त्वष्टारं यज। नृ०ये०हे। त्वष्टारं तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराण
स्यस्व। यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामा वौ० इदं त्वष्ट्रे
न०। ऋता येंतर्धानं पुरस्तात्पत्न्यन्वारभतेध्वर्युः। देवानां पत्नीभ्योनुब्रूहि। दे
वानां पत्नीरुशतीरवंतु नः प्रावंतु नः स्तुजये वाजसातये। याः पार्थिवासो या
अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छंतु। चतु०। ॐ० श्र० देवानां पत्नीर्य
ज। नृ०ये०महे। देवानां पत्नीरुत ग्ना व्यंतु देवपत्नीरिंद्राण्यग्नाय्यश्विनी राट्
॥ आ रोदसी वरुणानी शृणोतु व्यंतु देवीर्य ऋतुर्जनीनां वौषट्। इदं देवा
नां पत्नीभ्यो न०। अंतर्धानं परास्य। अग्नये गृहपतयेनुब्रूहि। अग्निर्होता गृ
हपतिः स राजा विश्वा वेद जनिमा जातवेदाः। देवानामुत यो मर्त्यानां यजि

२५ ह्वः सप्रयजतामृतावों० ४ चतु०। ॐ० अ०। अग्निं गृहपतिं यजामहे० ये० हे अग्ने ग
हपतिं वयमुत्वा गृहपते जनानामग्ने अकर्म समिधा बृहंतं। अस्थूरि नो गार्ह
पत्यानि सन्तु तिग्मेन नस्तेजसा संशिशाधी ४ वौ ४ ०। इदमग्नये गृहपतये०।
अथ सर्वहोमः। इडां पश्चा चावत्तां। कृत्वा होत्रे प्रदाय। पूर्ववत्। ततः पर्वाज
नादि कृत्वा। इडोपह्वानं। यथाहत्य वसवो गौर्यं चित्पदि षिताममुंचता यज
त्राः। एवो ष्वस्मन्मुंचता व्यंहः प्रतार्यग्ने प्रतरं न आयुः। इडोपहूतो०। पूर्वव
त्। इडासि स्योनासि० पूर्ववत्। मार्जनं। शंय्व यं ते वेदस्तृणमादाया न क्षिप्र
सर्वत। स्कन्नस्कवे स्रुच्याचि च। वेदस्य कंडणमादिष्य। अयं नु कामन त्रि। म
ध्यं० स्क वेबु ४ ६ स्थाल्यां। अनुप्रहर। चक्षुष्पा असि चक्षुर्मे पाहि। ॐ। सं
वदस्व। अगानग्नीत्। अगन्। श्रावय। श्रौषट्। स्वगा दैव्या होतृभ्यः स्वस्ति २५

श्री२

र्मानुषेभ्यः। शंयोर्ब्रूहि। तच्छंयो० पूर्ववत्। ॐ०। शं यं ते स्रुक् स्रुवं प्रगृह्यान्य
ग्ने दर्व्याय चिति। ॐ अग्ने दब्धायोऽशीततम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दु
रिष्ट्यै पाहि दुरद्मन्या अविषं नः पितुं कृणु सुषदा योनौ स्वाहा वाट्। इदमग्नये
ऽदब्धाय ऽशीततमाय०। स्रुचः शेषं जुहोति। सव्येन हस्तेन दक्षिणानि मुंजुहोति।
एकैकस्मात् गृह्याणामुस्त्या आहुतिं द्वयं जुहोति। ॐ अग्नये संवेशपतये स्वाहा। इ
दमग्नये संवेशपतये०। सरस्वत्यै यशोभगिन्यै स्वाहा। इदं सरस्वत्यै यशोभ
गिन्यै०। चतुर्गृहीतं गृहीत्वा। ॐ बलं खले मुसले पच्च शूर्पं च्यो। शिलोपदृषदि
यत्कपाले। उलूखलो विरूषः संजुहोमि। सत्याः संतु यजमानस्य कामाः स्वाहा
। इदं प्रधानदेवताभ्यो न मम। ब्रह्मप्रायश्चित्तादि चतुर्गृहीतं कृत्वा गार्हपत्ये
कृष्णो समीहोमः॥ ऋग्वेदे चेद्वोषः स्यात् तं नारायणः स्वाहा। चतुर्गृहीतं

२६ त्वा। अन्वाहार्यपचने हुत्वा समिद्धोमः। यजुर्वेदे चे० भुवः स्वाहा। पुनः चतु०।
हुत्वा आहवनीये हुत्वा समिद्धोमः। सामवेदे चे० स्वः स्वाहा। इदमग्नये। इदं वा
यवे। इदं सूर्याय। व्याहृतीनां त्यागः। पुनः चतु०। अज्ञायमाने चेद्धोमः भूर्भुवः
स्वः स्वाहा इदं प्रजापतये। ॐ भूर्भुवः स्वः स्वाहा। ॐ अयाश्चाग्नेस्यनभिशस्तिश्च
सत्यमित्वमया असि। अया सा मनसा हूतो या सं हव्यमूहिषे अयानः कृणु
हि भेषजं स्वाहा। इदमग्नेऽयसे न मम। इति मंत्रेण होमः। इत्याहुतिचतुष्टयमा
हवनीये वेदविमोकादि होता। वेदोसि येन त्वं देव वेद देवेभ्यो वेदोभवस्तेन
मह्यं वेदो भूयाः। प्र त्वा मुञ्चामीति योक्त्रविमोकं करोति। प्र त्वा मुंचामि वरुण
स्य पाशाद्येन त्वा बध्नात्सविता सुशेवः। ऋतस्य योनौ सुकृतस्य लोके रिष्टां त्वा स २६
ह पत्या दधामि। प्र मा मुञ्चा ऽ० पत्नी अंजलौ कृत्वा। अद्भिः परिषिंचं जपति

कामाय त्वा वेदोसि येन त्वं देव वेद देवेभ्यो वेदोभवस्तेनास्मभ्यं वेद एधि। वेदो
सि वित्तिरसि विदेयं कर्मासि करुणमसि क्रियासं सनिरसि सनितासि सनेयं। घृ
तवन्तं कुलायिनं रायस्पोषं सहस्रिणं। वेदो ददातु वाजिनमिति वेदे पत्नी पा
चयति। पत्नी तृणान्युलुप्य स्थाने। तंतुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः
पथो रक्ष धिया कृतान्। अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनं
। गार्हपत्यादाहवनीयपर्यन्तं स्तृणाति। आदृणोसि संदृणः प्रजया मा पशुभिरा
दृण वेदं शेषमुपस्थाय एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विद
वा। उत प्रणेष्यभि वस्यो अस्मान्सं नः सृज सुमत्या वाजवत्या आया घृतं जात
वेदा अंतरः पूर्वो अस्मिन्निषद्य। सन्वन्सनिं सुविमुचा विमुंच धेह्यस्मभ्यं द्रविणं
जातवेदः। इत्याहवनीयमुपस्थाय। उपस्थश्योस्पते। आप्यायतां ध्रुवः।

२१ सुप्यर्या॰ अस्मिन्॰ आप्यायतां॰ ऋचांश्च यजुः समिध्य यजुर्जुहोति देवा गातु विद
इति। समिध्य यजुर्हूयमानं यजमानोन्वारभते ॐ देवा गातुविदो गातुं वित्त्वा गातुमि
त मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः। इदं वाताय न मम। ऋचा यास मि
ध्य यजुः समयमानं जुहोति। बर्हिसं बर्हिरिति। ॐ सं बर्हिरंक्तां हविषा घृतेन
समादित्यैर्वसुभिः सं मरुद्भिः। समिंद्रो विश्वदेवेभिरक्तं दिव्यं नभो गच्छतु यत्स्वा
हा। ॐ इदं दिव्याय नभसे न मम। वेदाग्रं प्रणीता निनयति। परीत्य करोति। ॐ क
स्त्वा विमुंचति स त्वा विमुंचति। कस्मै त्वा विमुंचति तस्मै त्वा विमुंचति। पोषाय
पुरोडाश कपालेन करणेन पास्यत्यधः। रक्षसां भागोसि। ॐ रक्ष
सां भागोसि। इदं रक्षोभ्यः। पूर्णपात्रं यजमानाय प्रयच्छति। पूर्णपात्रं गृहीत्वा २१
यजमानः पूर्णपात्रमभिमृश्य॥ ॥ इति पद्धतिः समाप्ता॥ ॥